सरस्वतीरहस्योपनिषत्

वाङ्मे मनसि—इति शान्तिः

सरस्वतीदशश्लोक्याः तत्त्वज्ञानसाधनत्वम्

ऋषयो ह वै भगवन्तमाश्वलायनं संपूज्य पप्रच्छुः—

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।
यदुपासनया तत्त्वं जानासि भगवन् वद ॥ १ ॥

सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया ।
स्तुत्वा जप्त्वा परां सिद्धिमलभं मुनिपुङ्गवाः ॥ २ ॥

प्रतियोगिविनिर्मुक्तब्रह्मविद्यैकगोचरम् ।
अखण्डनिर्विकल्पात्तरामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं सरस्वतीरहस्योपनिषत् महासरस्वतीविद्याप्रकटनपूर्वकं षट्समाधिप्रपञ्चनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । ऋषिगणाश्वलायनप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—ऋषय इति । किमिति ? केनोपायेनेति ॥ १ ॥ प्रश्नोत्तरं मुनिराह—सरस्वतीति । वक्ष्यमाणया सरस्वतीदशश्लोक्या ॥ २ ॥

दशश्लोक्या ऋष्यादि

ऋषय ऊचुः—

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भगवती वद ॥ ३ ॥

स होवाचाश्वलायनः—

अस्य श्रीसरस्वतीदशश्लोकमहामन्त्रस्य—अहमाश्वलायन ऋषिः । अनुष्टुप् छन्दः । श्रीवागीश्वरी देवता । यद्वागिति बीजम् । देवीं वाचमिति शक्तिः । प्रणो देवीति कीलकम् । विनियोगस्तत्प्रीत्यर्थे । श्रद्धा मेधा प्रज्ञा धारणा वाग्देवता महासरस्वतीत्येतैरङ्गन्यासः ॥ ४ ॥

नीहारहारघनसारसुधाकराभां
    कल्याणदां कनकचम्पकदामभूषाम् ।
उत्तुङ्गपीनकुचकुम्भमनोहराङ्गीं
    वाणीं नमामि मनसा वचसां विभूत्यै ॥ ५ ॥

ऋषयस्तं पुनः पप्रच्छुरित्याह—ऋषय ऊचुरिति ॥ ३ ॥ तैरेवं पृष्टः स होवाचाश्वलायनः । वक्ष्यमाणविद्याया ऋषिच्छन्दोदेवताबीजशक्तिकीलककराङ्गन्यासादिकमुच्यते—अस्येत्यादिना ॥ ४ ॥ ध्यानं तु—नीहारेति ॥५–३५॥

प्रणोदेवीतिमन्त्रस्य ऋष्यादि

प्रणोदेवीत्यस्य मन्त्रस्य—भरद्वाज ऋषिः । गायत्री छन्दः । श्रीसरस्वती देवता । प्रणवेन बीज[1]शक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ ६ ॥

[1] शक्तिः की—मु, ड. (एवमुत्तरपर्यायेष्वपि).

या वेदान्तार्थतत्त्वैकस्वरूपा [1]परमेश्वरी ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥ ७ ॥
ॐ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती ।
धीनामवित्र्यवतु ॥ ८ ॥

आ नो दिव इति मन्त्रस्य ऋष्यादि

आ नो दिव इति मन्त्रस्य—अत्रिर्ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । ह्रीमिति बीजशक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ ९ ॥

या साङ्गोपाङ्गवेदेषु चतुर्ष्वेकैव गीयते ।
[2]अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती ॥ १० ॥
ह्रीं आ नो दिवो बृहतः पर्वतादा
सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची
शग्मां नो वाचमुशती शृणोतु ॥ ११ ॥

पावका न इति मन्त्रस्य ऋष्यादि

पावका न इति मन्त्रस्य—[3]मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । श्रीमिति बीजशक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ १२ ॥

[1] परमार्थतः—अ १, अ २, क, मु.
[2] अद्वैत—अ २, क.
[3] मधुच्छन्दस—उ, मु.

या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते ।
अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥ १३ ॥
श्रीं पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञं वष्टु धिया वसुः ॥ १४ ॥

चोदयित्री इति मन्त्रस्य ऋष्यादि

चोदयित्रीति मन्त्रस्य—मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । ब्लूमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ १५ ॥

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदन्ती या सा मां पातु सरस्वती ॥ १६ ॥
ब्लूं चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥ १७ ॥

महो अर्ण इति मन्त्रस्य ऋष्यादि

महो अर्णेति मन्त्रस्य—मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । सौरिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ १८ ॥

अन्तर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥ १९ ॥
सौः महो अर्णः सरस्वती प्रचेतयति केतुना ।
धियो विश्वा विराजति ॥ २० ॥

चत्वारि वागिति मन्त्रस्य ऋष्यादि

चत्वारि वागिति मन्त्रस्य—उचथ्यपुत्र ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । ऐमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ २१ ॥

या प्रत्यग्दृष्टिभिर्जीवैर्व्यज्यमानाऽनुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥ २२ ॥

ऐं चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥ २३ ॥

यद्वागिति मन्त्रस्य ऋष्यादि

यद्वाग्वदन्तीति मन्त्रस्य—भार्गव ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । क्लीमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥२४॥

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती ॥ २५ ॥

क्लीं यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥ २६ ॥

देवीं वाचमिति मन्त्रस्य ऋष्यादि

देवीं वाचमिति मन्त्रस्य—भार्गव ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । सौरिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥२७॥

व्यक्ताव्यक्तगिरः सर्वे वेदाद्या व्याहरन्ति याम् ।
सर्वकामदुघा धेनुः सा मां पातु सरस्वती ॥ २८ ॥
सौः देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ २९ ॥

उत त्व इति मन्त्रस्य ऋष्यादि

उत त्व इति मन्त्रस्य—बृहस्पतिर्ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । समिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥३०॥

यां विदित्वाऽखिलं बन्धं निर्मथ्या[1]खिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥ ३१ ॥
सं उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥३२॥

अम्बितम इति मन्त्रस्य ऋष्यादि

अम्बितम इति मन्त्रस्य—गृत्समद ऋषिः । अनुष्टुप् छन्दः । सरस्वती देवता । ऐमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥३३॥

नामरूपात्मकं सर्वं यस्यामावेश्यतां पुनः ।
ध्यायन्ति ब्रह्मरूपैका सा मां पातु सरस्वती ॥ ३४ ॥
ऐं अम्बितमे नदीतमे [2]देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ ३५ ॥

[1] मखवर्त्मनाम्—अ १, अ २, क. [2] देवीत—उ १.

देवताप्रार्थना

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ ३६ ॥
नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥ ३७ ॥
अक्षसूत्राङ्कुशधरा पाश[1]पुस्तकधारिणी ।
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा ॥ ३८ ॥
कम्बुकण्ठी सुताम्रोष्ठी सर्वाभरणभूषिता ।
महासरस्वती देवी जिह्वाग्रे संनिवेश्यताम् ॥ ३९ ॥
या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ॥ ४० ॥
नमामि यामिनीनाथलेखाऽलंकृतकुन्तलाम् ।
भवानीं भवसंतापनिर्वापणसुधानदीम् ॥ ४१ ॥
यः कवित्वं निरातङ्कं भुक्तिमुक्ती च वाञ्छति ।
सोऽभ्यर्च्यैनां दशश्लोक्या नित्यं स्तौति सरस्वतीम् ॥ ४२ ॥
तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीम् ।
भक्तिश्रद्धाऽभियुक्तस्य षाण्मासात् प्रत्ययो भवेत् ॥ ४३ ॥
ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा ।
गद्यपद्यात्मकैः शब्दैरप्रमेयैर्विवक्षितैः ॥ ४४ ॥
अश्रुतो बुध्यते ग्रन्थः प्रायः सारस्वतः कविः ॥ ४५ ॥

देवतां प्रार्थयति—चतुर्मुखेति ॥ ३६–४५ ॥

[1] मस्तक—ड.

भगवत्याः ब्रह्मत्वं प्रकृतित्वं पुरुषत्वं च

[1]सा होवाच सरस्वती—

आत्मविद्या मया लब्धा ब्रह्मणैव [2]सनातनी ।
ब्रह्मत्वं मे सदा नित्यं सच्चिदानन्दरूपतः ॥ ४६ ॥
प्रकृतित्वं ततः सृष्टं सत्त्वादिगुणसाम्यतः ।
सत्यामाभाति चिच्छाया दर्पणे प्रतिबिम्बवत् ॥ ४७ ॥
तेन चित्प्रतिबिम्बेन त्रिविधा भाति सा पुनः ।
प्रकृत्यवच्छिन्नतया पुरुषत्वं पुनश्च [3]मे ॥ ४८ ॥

मयैवं स्तुता भगवती दृष्टिविषये प्रसन्ना भूत्वा स्वानुभूतिप्रकटनेन स्वात्मतत्त्वमुपदिदेशेत्याह—सा होवाच सरस्वतीति । किमुवाचेत्यत्र—आत्मविद्येति । स्वातिरिक्तमनात्मा तदसंभवप्रबोधसिद्ध—स्वयमेवात्मा स्वात्मातिरिक्तं न किंचिदस्ति स्वात्मैव निष्प्रतियोगिकाद्वितीय इति—वेदनमेव स्वात्मविद्या सनातनी पुरा विश्वसृजा ब्रह्मणा प्रसन्नेन मया लब्धा विदितेत्यर्थः । स्वात्मवेदनमात्रतः ब्रह्मत्वं ते कुत इत्यत आह—ब्रह्मत्वमिति । ममानृतजडदुःखात्मकनामरूपप्रपञ्चग्राससच्चिदानन्दरूपत्वात् सदा मे ब्रह्मत्वं सिद्धमेवेत्यर्थः ॥४६॥ प्रकृतिस्त्वद्भिन्नेत्यत आह—प्रकृतित्वमिति । स्वाज्ञदृष्ट्या स्वातिरेकेण या प्रकृता सेयं प्रकृतिः तद्भावः प्रकृतित्वमपि मया सृष्टं कुत इत्यत्र ततो गुणसाम्यतः, सत्त्वादिगुणत्रयं यत्र साम्यं भजति तद्गुणसाम्यं, तद्योगतः प्रकृतित्वमपि स्यादित्यर्थः । किं प्रकृतिर्ब्रह्मवद्वास्तवी इत्याशङ्क्य स्वाज्ञदृष्ट्या मयि विकल्पितेत्याह—सत्यामिति । मयि सत्यां दर्पणे प्रतिबिम्बवत् भाविसर्वानर्थगर्भिणी चिच्छाया

[1] "इत्येवं निश्चयं विप्राः" इत्यधिकः (मु) कोशे.
[2] सनातना—अ १, क, उ १.
[3] ते—अ २, क, मु

चित्सामान्यरूपिणी गुणसाम्यात्मिका मयि विकल्पिता आभातीत्यर्थः ॥ ४७ ॥ एवं त्वयि प्रकृतिकल्पनातः किं स्यादित्यत आह—तेनेति । येयं चितिर्मयि प्रतिबिम्बिता तेन चित्प्रतिबिम्बेन वपुषा सा पुनः प्रकृत्यावरणविक्षेपभेदतो निर्विभागव्यष्टिसमष्टिभेदतो वा त्रेधा विभातीत्यर्थः । तत्र निर्विभागसमष्टिव्यष्टिप्रकृतियोगतः अविकल्पेश्वरजीवत्वमपि भवेदित्याह—प्रकृतीति । या त्रेधा प्रविभक्ता तत्कलनाविरळं निर्मायं ब्रह्म निष्प्रतियोगिकमेव । निर्विभागगुणसाम्यसाक्षितया पूरणात् पुरुषत्वं, समष्टिप्रकृतिप्राकृतावच्छिन्नान्तर्यामितया पूरणात् पुरुषत्वमीश्वरत्वं, व्यष्टिप्रकृतिप्राकृतावच्छिन्नतया पुरुषत्वं जीवत्वं च पुनश्च मे न स्वतः इत्यर्थः ॥ ४८ ॥

मायावशात् भगवत्या ईश्वरत्वम्

शुद्धसत्त्वप्रधानायां मायायां बिम्बितो ह्यजः ।
सत्त्वप्रधाना प्रकृतिर्मायेति प्रतिपाद्यते ॥ ४९ ॥
सा माया स्ववशोपाधिः सर्वज्ञस्येश्वरस्य हि ।
वश्यमायत्वमेकत्वं सर्वज्ञत्वं च तस्य तु ॥ ५० ॥
सात्त्विकत्वात् समष्टित्वात् साक्षित्वाज्जगतामपि ।
जगत् कर्तुमकर्तुं वा चान्यथा कर्तुमीशते ।
यः स ईश्वर इत्युक्तः सर्वज्ञत्वादिभिर्गुणैः ॥ ५१ ॥

ईश्वरत्वं कथमित्यत्र—शुद्धसत्त्वेति । शुद्धसत्त्वप्रधानमायाप्रतिफलनचैतन्यमीश्वर इत्यर्थः । माया कीदृशी इत्यत्र—सत्त्वप्रधानेति ॥ ४९ ॥ ईश्वरस्य मायोपाधिकत्वेन तद्वशवर्तित्वं स्यात् इत्यत आह—सेति । येयं ईश्वरत्वहेतुः सा माया सर्वज्ञेश्वरस्य स्ववशोपाधिः । तस्य मायातत्कार्यासङ्गत्वेन वशीकृतमायत्वात् वश्यमायत्वं स्वातिरिक्तद्वयाभावात् एकत्वं स्वाज्ञविकल्पितं सर्वं स्वदृष्ट्या नेतीति

ज्ञातृत्वात् सर्वज्ञत्वं च तस्यैव ॥ ९० ॥ किंच—स्वदृष्ट्या निर्गुणत्वेऽपि स्वाज्ञदृष्टिसमर्पितसत्त्वगुणोपाधित्वात् समष्ट्यारोपाधारत्वात् स्वारोपितजगतामपि तद्भावाभावप्रकाशकतया साक्षित्वात् किं बहुना यो जगत् कर्तुं अकर्तुं अन्यथा वा कर्तुं ईष्टे सर्वज्ञत्वादिगुणैः सोऽयं ईश्वरः इत्युक्तो भवतीत्यर्थः ॥ ९१ ॥

मायाया विक्षेपावरणशक्तिद्वयम्

शक्तिद्वयं हि मायाया विक्षेपा[1]वृतिरूपकम् ।
विक्षेप[2]शक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत् ॥ ९२ ॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥ ९३ ॥

ईश्वरोपाधिमायास्वरूपमुक्त्वा मायाकार्यशक्तिद्वयं तत्कार्यं चाह— शक्तिद्वयमिति । यत् मायायाः कार्यं विक्षेपावृतिरूपकं तत् शक्तिद्वयम् । हिशब्दोऽवधारणे । तत्र विक्षेपकार्यं तु स्थावरजङ्गमतत्प्रविभक्तविविधाकारेण क्षिपति परिणमत इति विक्षेपशक्तिः लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत् ॥ ९२ ॥ विक्षेपकार्यमुक्त्वा आवरणकार्यमाह—अन्तरिति । स्वान्तर्हृदि दृक् प्रत्यक् दृश्यं अन्तःकरणं तयोः भेदं बहिः सच्चिदानन्दं ब्रह्म नामरूपात्मकः सर्गः तयोः भेदं च या आवरणशक्तिः आवृणोति सेयं अपरा शक्तिः संसारस्य कारणं भवतीत्यर्थः ॥ ९३ ॥

जीवस्वरूपम्

साक्षिणः पुरतो भातं लिङ्गदेहेन संयुतम् ।
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ ९४ ॥

[1] वरणात्मकम्—अ १, अ २, क.
[2] शक्तिलिङ्गा—अ १, क, उ.

तदावृतजीवस्वरूपमाह—साक्षिण इति । साक्षादीक्षत इति साक्षी तस्य पुरतो भातं स्वाज्ञानं स्वकार्यलिङ्गदेहेन संयुतं चितिः चैतन्यं छाया बुद्धिः स्वाज्ञानं पुरस्कृत्य तयोः समावेशात् ऐक्याध्यासात् व्यावहारिकजीवः स्यात् विभ्रो भवतीत्यर्थः ॥ ५४ ॥

आवृतिनाशे भेदनाशः

अस्य जीवत्वमारोपात् साक्षिण्यप्यवभासते ।
आवृतौ तु विनष्टायां भेदे भातेऽपयाति तत् ॥ ५५ ॥
तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ ५६ ॥
अत्राप्यावृतिनाशे न विभाति ब्रह्मसर्गयोः ।
भेदस्तयोर्विकारः स्यात् सर्गे न ब्रह्मणि क्वचित् ॥ ५७ ॥

जीवस्य जीवत्वं सत्यं इत्याशङ्क्य स्वावृत्यपाये जीवो ब्रह्मेत्याह—अस्येति । अस्य प्रतीचः स्वाज्ञारोपात् जीवत्वं सर्वसाक्षिण्यपि स्वस्मिन् अवभासते । स्वज्ञानसवित्रा ध्वान्तावृतौ विनष्टायां स्वान्तर्विलसितदृग्दृश्ययोः भेदे भाते तत् दृग्दृश्यभेदावरणं अपयाति ॥ ५५ ॥ यथा स्वान्तः या शक्तिः तथा ब्रह्मसर्गयोश्च भेदमावृत्य तिष्ठति तदावरणशक्तिवशात् अविकृतमपि ब्रह्म विकृतत्वेन अवभासते ॥ ५६ ॥ ब्रह्मसर्गभेददर्शनज्ञानतो भेदावृतिर्नश्यतीत्याह—अत्रेति । अत्र बाह्येऽपि ब्रह्मसर्गयोः भेदावृतिनाशे न तयोः भेदो विभाति । तद्भेदविकारः सर्ग एव न कश्चिद्ब्रह्मणि भवेदित्यर्थः ॥ ५७ ॥

सत्प्रपञ्चे ब्रह्मजगद्रूपयोः विवेकः

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ ५८ ॥

दृश्यमानप्रपञ्चे कोऽयं ब्रह्मांशः कोऽयं प्रकृत्यंशः इत्यत आह—अस्तीति। इदमिदं वस्त्वस्ति इत्यत्र घटपटादिभेदेन इदमंशो भिन्नेऽपि तद्गतास्तित्वस्यैकरूपत्वात् तत्सत् सन्मात्रमुच्यते, "सन्मात्रमसदन्यत्" इति श्रुतेः। इदं भाति इदं भाति इत्यत्र इदमंशो भिन्नेऽपि तदनुस्यूतभानं चित्, "चिन्मात्रमेव चिन्मात्रं" इति श्रुतेः। इदं प्रियं इदं प्रियं इत्यत्र नामरूपविकृतितः इदमंशे भिन्नेऽपि तदनुस्यूतप्रियस्य निरतिशयानन्दरूपत्वात् प्रियमानन्दघनमित्यर्थः। यदस्तित्वभावमापन्नं तदेव भातीति प्रतीत्यर्हं, यत् भातं तदेव प्रियं भवति "सद्घनोऽयं चिद्घन आनन्दघनः" इति श्रुतेः। इदमस्य रूपं इदमस्य नाम इति नामरूपे मिथो भिद्येते। अस्तिभातिप्रियाणां सच्चिदानन्दानां सर्वानुस्यूतत्वेनैकरूपत्वात् आद्यं त्रयं ब्रह्मरूपं, यदपरं नामरूपात्मकं द्वयं तन्मायाजगद्रूपं भवतीत्यर्थः॥ ५८॥

ब्रह्मांशे समाधिविधानम्

उपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः।
समाधिं सर्वदा कुर्याद्धृदये वाऽथ वा बहिः॥ ५९॥

स्वान्तर्बाह्यविलसितमायांऽशत्यागपूर्वकं ब्रह्मांशे मनस्समाधानं कुर्यादित्याह—उपेक्ष्येति॥ ५९॥

षड्विधसमाधयः

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि।
दृश्यशब्दा[1]नुभेदेन सविकल्पः पुनर्द्विधा॥ ६०॥
कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम्।
ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः॥ ६१॥

असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ।
अस्मीतिशब्दविद्धोऽयं समाधिः सविकल्पकः ॥ ६२ ॥
स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्षितुः ।
निर्विकल्पसमाधिः स्यान्निवातस्थितदीपवत् ॥ ६३ ॥
[1]हृदि वा बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूपपृथक्कृतिः ॥ ६४ ॥
स्तब्धीभावो रसास्वादात् तृतीयः पूर्ववन्मतः ।
एतैः समाधिभिः षड्भिर्नयेत् कालं निरन्तरम् ॥ ६५ ॥

हृदये बाह्ये वा सविकल्पनिर्विकल्पभेदेन समाधिर्भिद्यत इत्याह—सविकल्प इति । दृश्यशब्दभेदेन सविकल्पोऽपि द्विधा भिद्यत इत्याह—दृश्येति ॥ ६० ॥ तत्रान्तर्दृश्यानुविद्धसविकल्पकसमाधिमाह—कामाद्या इति । अस्याः कामवृत्तेः संकल्पवृत्तेः संशयादिवृत्तेर्वा भावाभावसाक्षित्वेन यच्चैतन्यं वर्तते तदेवाहमस्मीति ध्यानमनुसन्धानं दृश्यानुविद्धसमाधिः ॥ ६१ ॥ शब्दानुविद्धसमाधिमाह—असङ्ग इति । असङ्ग इत्यादिविशेषणविशिष्टं ब्रह्मास्मीति कामादिदृश्योपेक्षापूर्वकं केवलशब्दावलम्बनतया स्थितिः शब्दानुविद्धसविकल्पकसमाधिः ॥ ६२ ॥ स्वान्तर्निर्विकल्पकसमाधिमाह—स्वानुभूतीति । ब्रह्मानुभूत्यनुभवबलात् पूर्वानुष्ठितदृश्यशब्दोपेक्षा जायते । तादृशाधिकारिणो निवातस्थितदीपवत् निर्विकल्पकसमाधिर्भवतीत्यर्थः ॥ ६३ ॥ स्वान्तस्समाधित्रयमुक्त्वा बाह्यसमाधित्रयमाह—हृदीति । स्वहृदि विभातकामादिदृश्यवत् स्वबाह्यविलसितघटपटादिनामरूपे मिथ्यातदारोपापवादाधारतया यच्चैतन्यं वर्तते तन्नामरूपपृथक्कृतिसिद्धं ब्रह्मास्मीति बाह्यदृश्यानुविद्धसमाधिः । तथा सर्वाधिकरणं ब्रह्मास्मीति नामरूपोपेक्षापूर्वकं शब्दमात्रवृत्तिः बाह्यशब्दानुविद्धसमाधिर्भवती-

[1] हृदीव—उ, मु.

त्यर्थः ॥ ६४ ॥ बाह्यनिर्विकल्पकसमाधिमाह—स्तब्धीभाव इति । बाह्यदृश्यशब्दानुविद्धसमाध्युपेक्षापूर्वकं निवातस्थितदीपवत् स्तब्धीभावोऽयं तृतीयो निर्विकल्पकसमाधिरित्यर्थः । विद्वानेतैरेव कालं नयेदित्याह—एतैरिति ॥ ६५ ॥

निर्विकल्पसाक्षात्कारः

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥ ६६ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ६७ ॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥
इत्युपनिषत् ॥ ६८ ॥

निर्विकल्पात्मसाक्षात्कारः कदा भवतीत्याशङ्क्य देहादावात्मात्मीयाभिमानासंभवनिर्विशेषब्रह्मज्ञानसमकालं पुरा यत्र यत्र मनो याति तत्र तत्र परामृतपरमात्मैव प्रकाशत इत्याह—देहेति । बहिर्मुखदशायां विद्वन्मनो यत्र यत्र धावति तत्र तत्र ब्रह्मैव विभाति । एवं निर्विकल्पकज्ञानवान् मुनिः निष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्यर्थः ॥ ६६ ॥ निष्प्रतियोगिकब्रह्ममात्रज्ञानिनोऽपि स्वाज्ञवत् ग्रन्थिसंशयकर्मसंभवात् कथं विदुषो ब्रह्ममात्रतेत्याशंक्य स्वदृष्ट्या ब्रह्मातिरेकेण ग्रन्थिसंशयकर्मासंभवात् । यद्यस्तीति भ्रान्तिः तदा निर्विशेषब्रह्मज्ञानेन तद्[साऽ]पि विलीयत इत्याह—भिद्यत इति । स्वाज्ञविकल्पितसमष्टिप्रपञ्चाधारः परः, व्यष्टिप्रपञ्चापवादाधारः प्रत्यगवरः, तयोर्भेदाभेदौ यत्रासंभवतां गतौ प्रत्यक्परभेदसापेक्षभेदासहनिष्प्रतियोगिकाद्वैतात्मनि स्वावशेषतया दृष्टे सत्येवमस्य साधनचतुष्टयसंपत्त्यासादितपारमहंस्यधर्मपुंगवदनुष्ठितसर्ववेदान्तश्रवणमनननिदि-ध्यासनप्रादुर्भूततत्त्वज्ञानिनो हृदयग्रन्थिर्भिद्यते—स्वाविद्यापदतत्कार्यजातं इच्छ-

ब्देनोच्यते, अयंशब्देन तदारोपापवादाधिकरणमुच्यते, तयोस्तादात्म्यं हृदयग्रन्थिः। तस्मिन् भिन्ने अस्य सर्वसंशयाश्छिद्यन्ते निष्प्रतियोगिकब्रह्ममात्रज्ञानं मयाऽऽत्तमनात्तं वा, यद्यात्तं तदा तद्ब्रह्म साक्षात्कृतं न वा, तस्मिन् साक्षात्कृतेऽपि तन्मात्राऽवशेषलक्षणविदेहकैवल्यमस्ति वा न वा, तत्सिद्धावपि कालान्तरे स्वातिरिक्तास्तित्वभ्रमतः पुनर्जन्म भवेन्नवेत्यादिसर्वसंशयाः तत्त्वज्ञानासिना छिद्यन्ते। छिन्ने संशयपटलेऽस्य सर्वकर्माणि च क्षीयन्ते। तानि कर्माणि त्रिविधानि आगामिसंचितारब्धभेदात्। देहिनो देहारम्भात् परं यत् कृतं पुण्यादिकं तदागामिकर्म स्थूलप्रपञ्चासंभवज्ञानेन विलीयते। अनन्तकोटिजन्मोपादानकारणं संचितकर्म, तत् स्थूलसूक्ष्मप्रपञ्चापह्नवसिद्धब्रह्मज्ञानेन नश्यति। देहारंभात् परं देहावसानावधि सुखादिफलप्रदं प्रारब्धकर्म, तत् स्थूलसूक्ष्मबीजप्रपञ्चापह्नवसिद्धब्रह्ममात्रसम्यग्ज्ञानेन नश्यति। एवं कर्मक्षयसमकालं सदाद्यावृतित्रयं भ्रान्तिजादितादात्म्यत्रयं चाप्यपह्नवं भजति। ततस्तुर्यप्रपञ्चापह्नवसिद्धब्रह्ममात्रतत्त्वज्ञदृष्ट्या ग्रन्थिसंशयकर्मावरणतादात्म्यासंभवात् विद्वान् निष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यत इत्यत्र नहि विवादोऽस्तीत्यर्थः॥ ६७॥ यत एवं अतः मयि जीवत्वमिति। स्वस्य निष्प्रतियोगिकत्वेन स्वतिरिक्ततत्कल्पनाया मृग्यत्वात्। विद्याफलमाह—इतीति। "आत्मविद्या मया लब्धा" इत्यादि "कल्पितं वस्तुतो नहि" इत्यन्तं यथावत् यो जानाति स मुक्तो भवति इत्यत्र न हि संशयोऽस्ति॥६८॥ इत्युपनिषच्छब्दः सरस्वतीरहस्योपनिषत्समाप्त्यर्थः।

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
सरस्वतीरहस्यस्य व्याख्यानं लिखितं स्फुटम्।
प्रकृतोपनिषद्व्याख्याग्रन्थः षष्ट्युत्तरं शतम्॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षष्ट्युत्तरशततसङ्ख्यापूरकं सरस्वतीरहस्योपनिषद्विवरणं सम्पूर्णम्॥